# अन्नपूर्णास्तोत्रम् ३

Annapurnastotram 3

sanskritdocuments.org

February 19, 2019

Annapurnastotram 3

# अन्नपूर्णास्तोत्रम् ३

## Sanskrit Document Information

Text title : annapUrNAstotram

File name : annapUrNAstotram.itx

Category : devii, devI, pArvatI, annapUrNa, shankarAchArya

Location : doc_devii

Author : Adi Shankaracharya

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 19, 2019

*sanskritdocuments.org*

# अन्नपूर्णास्तोत्रम् ३

मन्दार-कल्प-हरिचन्दन-पारिजात-
मध्ये शशाङ्क-मणिमण्डित-वेदिसंस्थे ।
अर्धेन्दु-मौलि-सुललाट-षडर्धनेत्रे
भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यम् ॥ १॥

केयूर-हार-कटाङ्गद -कर्णपूरे
काञ्ची कलाप-मणिकान्त-लसद्दुकूले ।
दुग्धा-ऽन्नपात्र-वर-काञ्चन-दर्विहस्ते
भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यम् ॥ २॥

आली-कदम्ब-परिसेवित-पार्श्वभागे
शक्रादिभि-मुकुलिताञ्जलिभिः पुरस्तात् ।
देवि! त्वदीय-चरणौ शरणं प्रपद्ये
भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यम् ॥ ३॥

गन्धर्व-देव-ऋषिनारद-कौशिकाऽत्रि
व्यासा-ऽम्बरीष -कलशोद्भव -कश्यपाद्याः ।
भक्त्या स्तुवन्ति निगमाऽऽगम-सूक्तमन्त्रै-
र्भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यम् ॥ ४॥

लीलावचांसि तव देवि! ऋगादिवेदाः
सृष्ट्यादि-कर्मरचना भवदीय-चेष्टा ।
त्वत्तेजसा जगदिदं प्रतिभाति नित्यं
भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यम् ॥ ५॥

शब्दात्मिके शशिकलाभरणार्धदेहे
शम्भोरुरस्थल -निकेतन -नित्यवासे ।
दारिद्र्यदुःख-भयहारिणि का त्वदन्या
भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यम् ॥ ६॥

सन्ध्यात्रये सकल-भूसुर-सेव्यमाने
    स्वाहा स्वधामि पितृदेवगणार्तिहन्त्री ।
जायाः सुताः परिजनातिथयोऽन्नकामाः
    भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यम् ॥ ७॥

सद्भक्तकल्पलतिके भुवनैकवन्द्ये
भूतेश -हृत्कमलमग्न -कुचाग्रभृङ्गे
कारुण्यपूर्णनयने किमुपेक्षसे मां
भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यम् ॥ ८॥

अम्ब! त्वदीय -चरणाम्बुजसंश्रयेण
    ब्रह्मादयोऽप्यविकलां श्रियमाश्रयन्ते ।
तस्मादहं तव नतोऽस्मि पदारविन्दं
    भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यम् ॥ ९॥

एकाग्रमूलनिलयस्य महेश्वरस्य
    प्राणेश्वरी प्रणत-भक्तजनाय शीघ्रम् ।
कामाक्षि-रक्षित-जगत्-त्रितयेऽन्नपूर्णे!
    भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यम् ॥ १०॥

भक्त्या पठन्ति गिरिजा-दशकं प्रभाते
    मोक्षार्थिनो बहुजनाः प्रथितोऽन्नकामाः ।
प्रीता महेशवनिता हिमशैलकन्या
    तेषां ददाति सुतरां मनसेप्सितानि ॥ ११॥

इति श्रीशङ्कराचार्यविरचितमन्नपूर्णास्तोत्रं सम्पूर्णम् ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Annapurnastotram 3*

pdf was typeset on February 19, 2019

Please send corrections to *sanskrit@cheerful.com*